# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा- दिसम्बर-२०१८

| | | |
|---|---|---|
| कक्षा – **शास्त्री-०३ सेमेस्टर-०५** | **प्रश्नपत्रम्- ०७** | गुणाः - ७० |
| विषयः– पौरोहित्यम् | कोड – CE-3.5.9 | समयः – १० :०० तः ०१:०० |
| दिनाङ्कः – ११/१२/२०१८ | ग्रन्थः – याज्ञिकन्यायमाला | |

**प्रथमान्वितिः**

प्रश्नः १ निम्नलिखितेषु श्लोकेषु द्वयोः व्याख्या विधेया। १०

(१) मन्त्रेऽङ्गिरस्वदित्यादौ वतिना नामदर्शनम्।

नापौरुषेयत्वं वेदस्य साधयेदिति नो तथा॥

(२) माध्यन्दिनीयशाखायां द्वित्वाद्याः सन्ति केचन।

धर्मास्ते जपहोमादौ प्रयोज्या वा न वेति चेत्॥

(३) अनुपेताः स्त्रियः शूद्रा निर्मन्त्रं कर्मकारिणः।

तेषां कृते श्लोकवाक्यप्रयोगोऽस्त्युचितोन वा॥

प्रश्नः २ मन्त्रलक्षणाधिकरणं विलिख्य अनुपनीतानां लौकिकमन्त्रप्रयोजनं लिखत। १०

अथवा

वेदलक्षणानि स्पष्टीकृत्य वेदाध्ययनविधेः निरूपणं यथाग्रन्थं कुरुत।

**द्वितीयान्वितिः**

प्रश्नः ३ अधस्तनेषु श्लोकेषु द्वयोः व्याख्या कार्या। १०

(१) यन्नास्ति स्वीयशाखायां चैत्ययज्ञादिकं ततः।

न ग्राह्यमुत वा ग्राह्यं न ग्राह्यं शाखिवाङ्मये।

अनुपलब्धेर्नैतदेवं कर्मैकत्वविनिश्चयात्॥

(२) दुर्बलोऽपि सदाचारः सूत्रानुज्ञाबलादिह।

समुच्चीयेत विधिना चेति याज्ञिकनिर्णयः॥

(३) निरपेक्षा श्रुतिर्मान्या स्मार्ता कल्पश्रुति क्रिया।

दुर्बलाह्यसमा तेन भवेन्नैव समुच्चयः॥

प्रश्नः ४ श्रौतस्मार्तकर्मणोः भेदं प्रतिपाद्य वैशिष्ट्यं लिखत। १०

अथवा

द्वितीयाध्यायस्य सारांशं लिखत।

## तृतीयान्वितिः

प्रश्नः ५ अधस्तनेषु श्लोकेषु द्वयोः ससन्दर्भव्याख्या कार्या। १०

(१) यज्ञे विवाहे किं मांसमर्घे नित्यं न वा विधौ।
अधियज्ञादिवाक्येन नित्यं स्याद्गर्हणे सति ॥

(२) पुराणस्मृतिबोध्येषु पकयज्ञत्वकल्पना।
न युज्यते युज्येते वा न युक्ता लक्षणासहात् ॥

(३) कोटिलक्षजपादौ हि सङ्ख्या नैव नियम्यते।
कालमाश्रित्य संख्यास्यादृत्विजां पूर्तिहेतवे॥

प्रश्नः ६ दक्षिणापरिमाणाधिकरणं यथाग्रन्थं विवेच्यताम्। १०

अथवा

तृतीयाध्यायस्य विषयवस्तु प्रस्तूयताम्।

प्रश्नः ७ निम्नलिखितानां प्रश्नानाम् एकैकवाक्येन उत्तरं दीयताम्। १०

(१) याज्ञिकन्यायमालाग्रन्थस्य कर्ता कः ?
(२ ) कति स्नातकाः भवन्ति, के च ते ?
(३) कीदृशं कर्म वर्जितम्?
(४) द्विजकर्तव्यं किमस्ति?
(५) इतिहासस्य मुख्यं प्रयोजनं किम्?
(६) सूत्रेषु कयोः आचारयोः ग्रहणं कृतमस्ति?
(७) कात्यायनोक्तं यज्ञलक्षणं लिखत।
(८) ब्रह्मासनं कुत्र भवति?
(९) वेदं समाप्य किं कर्तव्यम्?
(१०) श्रौतकर्मसु स्त्रीणाम् अधिकारः अस्ति न वा ?
(११) प्रदोषव्रतं कदा भवति?
(१२) तृतीयाध्यायस्य नाम किम्?
(१३ ) गुरोः दक्षिणामानं किमस्ति?
(१४ ) शखाभेदात् वेदभेदो भवति न वा?
(१५ ) शतचण्डीपाठेषु कति ऋत्विजः भवन्ति?

***